किं बहुना । परस्परं द्वैधम् उत्पन्नम् । स च राज्ञः शरणं गतो ऽब्रवीत् । देव । एते पक्षिण एवं वदन्ति । यद् अस्माकं राजा किं करिष्यति । न कस्याप्य् आवासं दद्मः । मया चोक्तम् । न शोभनं युष्माभिर् अभिहितम् । अहं गत्वा राज्ञे निवेदयिष्यामि । एवं स्थिते देवः प्रमाणम् । ततो राजा भृत्यान् अब्रवीत् । भोः । गच्छत । सर्वान् पक्षिणो गतासून् कृत्वा शीघ्रम् आनयत । राजादेशानन्तरम् एव प्रचेलुस् ते । अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्रैकेन पक्षिणा वृद्धेनोक्तम् । भोः स्वजनाः । न शोभनम् आपतितम् । ततः सर्वैर् एकमतीभूय शीघ्रम् उत्पतितव्यम् । तैश् च तथानुष्ठितम् ॥

अतो ऽहं ब्रवीमि । भूतान् यो नानुगृह्णाति । इत्य् उक्त्वा पुनर् अपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा तत्र गत्वा सर्पप्रत्यायनार्थं निवेदितवान् । यन् मदीयपुत्रः स्वबुद्ध्या पञ्चत्वम् उपगतः । ततो भुजंगो ऽब्रवीत् । चितिकां दीपितां पश्य । इत्यादि ॥

तद् अस्मिन् हते ऽयत्नाद् एव राज्यम् अकण्टकं भवतो भवति ।

तस्यैतद् वचनं श्रुत्वा क्रूराक्षं पप्रच्छ । भद्र । त्वं तु किं मन्यसे । सो ऽब्रवीत् । देव । निर्दयम् एतत् । यद् अनेनाभिहितम् । यत्कारणम् । शरणागतो न वध्यते । सुष्ठु खल्व् इदम् आख्यानम् ।

> श्रूयते हि कपोतेन । शत्रुः शरणम् आगतः ।
> पूजितश् च यथान्यायं । स्वैश् च मांसैर् निमन्त्रितः ॥१२०॥

अरिमर्दनो ऽब्रवीत् । कथम् एतत् । क्रूराक्षः कथयति ।

## ॥ कथा ८ ॥

> कश्चित् *क्षुद्रसमाचारः । प्राणिनां कालसंमितः ।
> विचचार महारण्ये । घोरः शकुनिलुब्धकः ॥१२१॥